## आदिर्णमुल्यन्यतरस्याम् । (१९४/३६७७)

णमुलि [1]परतोऽन्यतरस्यामादिरुदात्तो भवति । लोलूयं लोलूयम्, लोलूयं लोलूयम् । पोपूयं पोपूयम्, पोपूयं पोपूयम् । आम्रेडितानुदात्तत्वे कृते पूर्वो लोलूयंशब्द एकत्राद्युदात्तः, अपरत्र लित्स्वरेण मध्योदात्तः ॥

## अचः कर्तृयकि । (१९५/३६७८)

उपदेशे इति वर्तते । अजन्ता ये [2]उपदेशे धातवः तेषां कर्तृयकि अन्यतरस्यामादिरुदात्तो भवति । लूयते केदारः स्वयमेव, लूयते केदारः स्वयमेव । स्तीर्यते केदारः स्वयमेव, स्तीर्यते केदारः स्वयमेव । यदाद्युदात्तत्वं न भवति तदा लसार्वधातुकनिघाते [3]कृते [4]यक एव स्वरो भवति । जनादीनामुपदेशे एवात्वं द्रष्टव्यम् । तत्राप्यय स्वर इष्यते । जायते स्वयमेव । सायते स्वयमेव । खायते स्वयमेव । अचः इति किम् ? भिद्यते स्वयमेव । कर्तृग्रहणं किम् ? लूयते केदारो देवदत्तेन ॥

## थलि च सेटीडन्तो वा । (१९६/३७२२)

सेटि थलि इट् वा उदात्तो भवति अन्तो वा आदिर्वा अन्यतरस्याम् । लुलविथ, लुलविथ, लुलविथ । यदा नैते त्रयः स्वराः, तदा लिति (६. १. १९३/३६७६) प्रत्ययात् पूर्वमुदात्तं भवति । तेनैते चत्वारः स्वरा पर्यायेण भवन्ति । सेटि इति किम् ? ययाथ[5] । लिति प्रत्ययात् पूर्वमुदात्तम् इत्ययमेव स्वरो [6]भवति ॥

## ञ्नित्यादिर्नित्यम् । (१९७/३६८६)

ञिति निति च नित्यमादिरुदात्तो [7]भवति । गर्गादिभ्यो यञ् (४.१. १०५/११०७)–गार्ग्यः । वात्स्यः । 'वासुदेवार्जुनाभ्यां [8]वुन्' (४. ३. ९८/१४७८)–वासुदेवकः । [9]अर्जुनकः । प्रत्ययस्वरापवादोऽयं योगः । प्रत्ययलक्षणमत्र नेष्यते, तेन गर्गाः, बिदाः, चञ्चाः इत्यत्र यञि कनि च लुप्ते न भवति ॥

## आमन्त्रितस्य च । (१९८/३६५३)

आमन्त्रितस्यादिरुदात्तो भवति । देवदत्त, देवदत्तौ, देवदत्ताः । अत्र 'कारकाद्दत्तश्रुतयोरेवाशिषि' (६. २. १४८/३८८२) इति प्राप्ति[10]र्बाध्यते । लुमता[11]ऽपि लुप्ते प्रत्ययलक्षणमत्रेष्यते, सर्पिरागच्छ, सप्तागच्छ इति ॥

---

1. परतः नास्ति ग. 2. उपदेशधातवः ह. 3. कृते नास्ति फ. 4. यकार एव क. ङ. 5. ययिथ इत्यधिकम् ह. 6. भवति नास्ति फ. 7. भवति नास्ति फ. 8. वुञ् क. 9. उदाहरणमिदं नास्ति क. 10. प्रतिषिध्यते क. ग. 11. अपि नास्ति क. फ.